

श्रीवादिकेसरि सुन्दरजामातृमुनिभिरनुगृहीतं



# ॥ नरसिंहाष्टकम् ॥

# Narasimhaa shatakam

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥

श्रीमदकलङ्कपरिपूर्णशशिकोटिश्रीधरमनोहरसटापटलकान्त ! ।
पालय कृपालय ! भवम्बुधिनिमग्नं दैत्यवरकाल ! नरसिंह ! नरसिंह ! ॥१ ॥
पादकमलाववनतपातकिजनानां पातकदवानल ! पतत्रिवरकेतो ! ।
भावनपरायण ! भवार्तिहरया मां पाहि कृपयैव नरसिंह ! नरसिंह ! ॥२ ॥
तुङ्गनखपङ्क्तिदलितासुरवरासृक्पङ्कनवकुङ्कुमविपङ्किलमहोरः ! ।
पण्डितनिधान ! कमलालय ! नमस्ते पङ्कजनिषण्ण ! नरसिंह ! नरसिंह ! ॥३ ॥
मौलिषु विभूषणमिवामरवराणां योगिहृसयेषु च शिरस्सु निगमानाम् ।
राजदरविन्दरुचिरं पदयुगं ते धेहि मम मूर्धि नरसिंह ! नरसिंह ! ॥४ ॥
वारिजविलोचन ! मदन्तिमदशायां क्लेशविवशीकृतसमस्तकरणायाम् ।
एहि रमया सह शरण्य ! विहगानां नाथमधिसुह्य नरसिंह ! नरसिंह ! ॥५ ॥
हाटककिरीटवरहारवनमालातारररशनामकरकुण्डलमणीन्द्रैः ।
भूषितमशेषनिलयं तव वपुर्मे चेतसि चकास्तु नरसिंह ! नरसिंह ! ॥६ ॥
इन्दुरविपावकविलोचन ! रमायाः मन्दिर ! महाभुजलसद्वररथाङ्ग ! ।
सुन्दर ! चिराय रमतां त्वयि मनो मे नन्दितसुरेश ! नरसिंह ! नरसिंह ! ॥७ ॥
माधव ! मुकुन्द ! मधुसूदन ! मुरारे ! वामन ! नृसिंह ! शरणं भव नतानाम् ।
कामद ! घृणिन् ! निखिलकरण ! नयेयं कालममरेश ! नरसिंह ! नरसिंह ! ॥८ ॥
अष्टकमिदं सकलपातकभयघ्नं कामदमशेषदुरितामयरिपुघ्नम् ।
यः पठति सन्ततमशेषनिलयं ते गच्छति पदं स नरसिंह ! नरसिंह ॥९ ॥

इति नरसिंहाष्टकं समाप्तम् ॥